# संस्कृतवार्ता:

**दिनाङ्क: - 23/12/2024** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य एकसप्ततिसहस्राधिकं नवनियुक्तेभ्य: कर्मिभ्य: नियुक्तिपत्राणि वितरितवान्। उक्तवान् च यत् विगत- सार्धैकवर्षे देशस्य प्रायश: दशलक्षं यावत् युवभ्य: सर्वकारीय-वृत्त्यवसरा: प्रदत्ता:।
- सर्वोच्चन्यायालयेन देशे चिकित्सकानां अल्पतां दूरीकर्तुं नीट-यूजी इति विशिष्ट-परामर्श-प्रक्रियायै आदिष्टम्।
- सर्वकारेण पञ्चम-अष्टमवर्गयोः कृते अनुत्तीर्णस्य नकरणस्य नीति निरस्ती कृत:।
- उत्तरप्रदेश-पञ्जाबयो: आरक्षिबलेन सह जाते एकस्मिन् सङ्घर्षे अद्य पीलीभीत जनपदे त्रय: खालिस्तान-सम्बद्ध: आतङ्कवादिन: व्यापादिता:।
- राष्ट्रस्य विकासाय कृषकाणां योगदानं संस्मरन् अद्य सम्पूर्णे देशे राष्ट्रियकृषकदिवसः आचर्यते।
- **अपि च,**
- अमेरिकादेशस्य नवनिर्वाचितेन राष्ट्रपतिना डोनाल्ड ट्रम्प इत्यनेन भारतीयमूलस्य अमेरिकीय-उद्यमशीलः श्रीराम कृष्णन् इत्येष: आर्टिफिशल् इन्टेलिजेन्स्, इत्यस्मिन् विषये व्हाइट्हाउस इत्यस्य वरिष्ठ-नीति-परामर्शकत्वेन नियुक्तः।

-

**अथ वार्ता: विस्तरेण**

**प्रधानमंत्री- वृत्त्यवसरमेलापकम्**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् विगत सार्धैकवर्षे देशस्य प्रायश: दशलक्षं यावत् युवभ्य: सर्वकारीय-वृत्त्यवसरा: प्रदत्ता:। असौ अद्य दृश्य-श्रव्य-परान्तर्जालीयमाध्यमेन एकसप्ततिसहस्राधिकं नवनियुक्तेभ्य: कर्मिभ्य: नियुक्तिपत्राणि वितरितवान्। अत्रावसरे प्रधानमन्त्री न्यगादीत् यत् एते वृत्त्यवसरा: पूर्णपारदर्शितया सह समुपलब्धा: क्रियन्ते। अपि च समर्पणेन सत्यनिष्ठया च सह राष्ट्रसेवां नवनियुक्तकर्मिण: कुर्वन्तीति। श्रीमोदिना निगादितं यत् विगतेभ्य: दशवर्षेभ्य: देशस्य विविधेषु मन्त्रालयेषु संस्थानेषु च वृत्त्यवसरेभ्य: अभियानं प्रचाल्यते। असौ अवदत् यत् वृत्त्यवसरयुतमेलापकानि युवान: शक्तं कुर्वन्तीति सहैव सम्भावनानां नूतनानि द्वाराणि उद्घाटयन्ति।

श्रीमोदी अग्रे प्रोक्तवान् यत् प्रशासनस्य नीतय: निर्णयाश्च ग्रामीणभारते वृत्त्यवसराणां स्ववृत्तयवसराणां नवीनान् मार्गान् निर्मान्ति इति। प्रशासनेन मातृभाषासु शिक्षापरीक्षयो: अनुमतिं प्रदत्त्वा अथ च त्रयोदशसु भाषासु नियुक्तिपरीक्षाया: सौविध्यस्य अनन्तरं ग्रामीण-न्यूनां सीमान्तसमुदायानां च भाषागतबाधा: अपसारिता:। अत्रावधौ श्रीमोदिना निगदितं यत् भारतं सप्तचत्वारिंशदधिक-द्विसहस्रतनवर्ष पर्यन्तं विकसित राष्ट्रं निर्मातुं प्रतिबद्धं वर्तत्ते प्रधानमन्त्रिणा सूचितं यत् प्रशासनेन मेकइनइण्डिया-आत्मनिर्भरभारताभियान-स्टार्टअपइण्डिया-स्टैण्डअपइण्डिया-डिजिटल इण्डिया-इत्येता: योजना: समारब्धा:।

**सर्वोच्चन्यायालय:**

सर्वोच्चन्यायालयेन चिकित्सा-परामर्श-समितिं भारते चिकित्सानाम् तीव्र-अभावं लक्षयन्, राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा (एन्. ई. ई. टी.) स्नातक-पाठ्यक्रमेषु रिक्त-चिकित्सा-आसनानि पूरयितुं विशेष-परामर्श-प्रक्रियाम् आयोजयितुं निर्देशः दत्तः। न्यायमूर्तिन्यो: बी. आर्. गवायि - के. वि. विश्वनाथन् इत्येतयोः पीठः इतोऽपि निर्देशं दत्तवान् यत् रिक्तानि एन्. आरआई. स्थानानि अपि सामान्यवर्गस्य आरक्षणरूपेण परिवर्त्यन्ते तानि, राज्यप्रवेशप्राधिकारिणां माध्यमेन च पूरितानि भवेयुः इति।

**डिटेन्शन्-नीतिः**

सर्वकारेण पञ्चम-अष्टमकक्षयो कृते नो-डिटेन्शन्-इति नीतिः निरस्ती कृत:। प्रसार माध्यमैः सह वार्तालापं कुर्वन्, शिक्षा-सचिवः सञ्जयकुमारः अवदत् यत्, ये छात्राः पञ्चम-अष्टमकक्षयो: वार्षिकपरीक्षायां अनुत्तीर्णाः अभवन्, तेभ्यः मासद्वयानन्तरं पुनः परीक्षां कर्तुं अवसरः प्रदास्यते। पुनः परीक्षायाः अनन्तरं यदि ते पुनः असफलाः भवन्ति तर्हि ते पदोन्नताः न भविष्यन्ति। असौ इत्यपि अवदत् यत् एते छात्राः प्राथमिकशिक्षायाः समाप्तिपर्यन्तं कस्मादपि विद्यालयात् निष्कासिताः न भविष्यन्ति इति। सचिवः अपि अवदत् यत् बालानां शिक्षणस्य परिणामं वर्धयितुं अयं निर्णयः कृतः इति।

**पीलीभीत-सङ्घर्ष:**

उत्तरप्रदेश-पञ्जाबयो: आरक्षिबलेन सह जाते एकस्मिन् सङ्घर्षे अद्य पीलीभीत जनपदे त्रय: खालिस्तान-सम्बद्ध: आतङ्कवादिन: व्यापादिता:। आशङ्का इयमस्ति यत् एते आतङ्कवादिन: दिसम्बरमासे नवदशदिनाङ्के पञ्जाबराज्यस्य गुरुदासपुर जनपदे आरक्षिस्थानके दुरापादिते ग्रेनेड इत्याख्ये आक्रमणे संलग्ना: आसन्। प्राप्तसूचनानुसारि पीलीभीतक्षेत्रे ख ालिसतान-आतङ्कीनां शङ्कितानां क्रियाकलापानां सूचना सम्प्राप्ता। तावत् आरक्षिण: संयुक्तदलं तान् आतङ्कीन: ग्रहीतुं प्रायतत परञ्च ते आरक्षकाणामुपरि भुशुण्डिकया प्रहारम् आरब्धवन्त: तदनु सङ्घर्षोऽयं जात:। जाते सङ्घर्षे आतङ्कवदिन: गभीरतया व्रणिता: अभवन् ते च उपचारार्थं सीएचसी पूरनपुर-चिकित्सालयं प्रेषितवन्त: परञ्च ते मृता: घोषिता:। पञ्जाब-आरक्षि-प्रमुख: गौरवयादव: वार्ताहरान् संसूचयत् यत् गुरुविन्दरसिंह-वीरेन्द्र सिंह-जसनप्रीस-सिंह-इत्येते त्रय: आरोपिण: अभिज्ञाता: सन्तीति।

**कृषकदिवसः**

अद्य सम्पूर्णे देशे राष्ट्रियकृषकदिवसः आचर्यते। अस्मिन् दिने राष्ट्रस्य विकासाय कृषकाणां योगदानं संस्मरन् दिवसोऽयं आमान्यते। दिवसोऽयं पूर्व प्रधानमन्त्रिण: चौधरीचरणसिंहस्य जन्मजयन्त्यवसरे परिपाल्यते। कृषकाणां महत्त्वपूर्णां भूमिकां स्वीकृत्य तेषां सामाजिक-आर्थिक-उत्थानस्य समर्थनाय प्रशासनेन नैके उपक्रमाः प्रारम्भिता: । प्रारब्धेषु उपक्रमेषु प्रधानमन्त्री-किसान-सम्मान-निधि, प्रधानमन्त्री-फसल-बीमा-योजना, प्रधानमन्त्री-किसान-मानधन-योजना च अन्तर्भवन्ति । एतासां योजनानम् अन्तर्गतं कृषकाणां कृते वित्तीयसुरक्षा, समाह्वाननिवारणं, दीर्घकालिक-सामाजिकसुरक्षा च प्रदीयते। उपराष्ट्रपति: जगदीप धनखड:, प्रधानमन्त्री नरेन्द्रमोदी, पूर्व प्रधानमन्त्रिणे चौधरीचरणसिंहाय श्रद्धांजलिं समर्पितवन्तौ ।

**भाजपेतिदलम्**

भारतीयजनतापार्टीतिदलं विधानसभा निर्वाचनात् प्राक् दिल्लीसर्वकारं विरुध्य आरोपपत्रं प्रसारितवत्। भाजपेतिदलस्य वरिष्ठनेता अनुरागठाकुर: दिल्ल्या: भाजपेतिदलप्रमुख: वीरेन्द्रसचदेवा: अन्ये चनेतार: आम-आदमी-पार्टीति-सर्वकारे दु:शासनस्य जनेभ्य: कृतवचनानाम् अपूर्ते: च आरोपं प्रख्यापयन्त: ते आरोपपत्राणि ख्यापितवन्त:। अत्रावधौ श्रीठाकुर: यमुनानद्या: प्रदूषणं वायुप्रदूषणं राज्ये भ्रष्टाचारं अन्यान् च विषयान् अखिलत् यस्मिन् आपदलस्य संयोजक: अरविन्दकेजरीवाल: पूर्वमुख्यमन्त्री च लक्ष्यीकृत:।

श्रीकेजरीवाल: भाजपेतिदलस्य आरोपान् त्यजन् उक्तवान् यत् भाजपेतिदलस्य समीपे तं विरुध्य विषया: नैक विद्यन्ते।

**ट्रम्प-भारतीयनियुक्तिः**

अमेरिकादेशस्य नवनिर्वाचितेन राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन भारतीयमूलस्य अमेरिकीय-उद्यमशीलः श्रीराम कृष्णन् इत्येष: आर्टिफिशल् इन्टेलिजेन्स्, इत्यस्मिन् विषये व्हाइट्हाउस इत्यस्य वरिष्ठ-नीति-परामर्शकत्वेन नियुक्तः। ट्रम्प: अवदत् यत्, कृष्णन इत्येष:, संघीयसर्वकारे ए.आई. नीतिम् आकारं प्रदातुं डेविड्-साक्स् इत्यनेन सह कार्यं करिष्यति, योहि व्हाट्हाउस इत्यस्मिन् ए.आई.-क्रिप्टोजारइत्यनयो: प्रभारी नियुक्त:। कृष्णन इत्यस्य नियुक्तिः भारतीय-अमेरिकीय-समुदायेन व्यापकरूपेण प्रशंसिता। नियुक्तिघोषणायाः अनन्तरं कृष्णन् इत्ययं सामाजिक-संचार पटले X इत्यत्र कृतज्ञतां प्रकटितवान्। इति।

**ऋतुविभाग:**

जम्मूकश्मीर-हिमाचलप्रदेश-पञ्जाब-मध्यप्रदेश-राज्येषु अति वृष्टिकारणेन शैत्यप्रकोपेन च उत्तरभारते शीतलहर्या: प्रभाव: दृश्यते। भारतीयऋतु विज्ञानविभागेन पश्चिमीय-विक्षोपकारणात् एतेषां राज्यानां अनेकेभ्य: जनपदेभ्य: नारङ्गवार्णिकी सञ्चेतना पख्यापिता।

**<u>दक्षिणाफ्रीका-दुर्घटना</u>**

दक्षिणाफ्रीकादेशे ह्य: मार्गदुर्घटनासु नवदशजनानां मृत्यु: अभवत्। लिम्पोपो प्रान्ते एन्-वन-इत्येतस्मिन् राजमार्गे सप्तकारयानानां पारस्परिक-सङ्घर्षात् विहितायां दुघर्टनायां सपतजनानां मृत्युरजायत। पञ्चजनाश्च व्रणिता: अभवन्। एकस्यां अन्यघटनायां पूर्वीय-केप-प्रान्ते द्वादशजना: दिवङ्गता:।

**।।इति वार्ता:।।**